Vaidika Pandit Sri V.Hariharan Collection, Sholinganallur, Chennai

संस्कृतविद्यासमिति-पत्रिका

संस्कृतश्रीः

SAMSKRITASRI

A Monthly Journal of
Samskrit Education Society

தனி ப்ரதி
விலை ரூ. 4

FEBUARY 2020

ஸம்ஸ்க்ருதஸ்ரீ:

ஸம்ஸ்க்ருத கல்விக்
கழக மாத இதழ்

212/13-1,
செயிண்ட் மேரிஸ் ரோடு,
மந்தைவெளி, சென்னை-28



काषायभूषोज्ज्वलदेहयुक्ता वेदान्तविद्या भवतारणाय।
श्रीकामकोटौ विजयेन्द्रनाम्ना पीठे सुपूते लसतीह काञ्च्याम्।।

வேதாந்த வித்யை, காவியணி துலங்கும் உடல்
பொலிய உலகோரைக் கரையேற்றும் பொருட்டு
புனிதமான ஸ்ரீகாமகோடிபீடத்தில் ஸ்ரீவிஜயேந்த்ரர்
என்னும் பெயரோடு பொலிந்து கொண்டிருக்கிறது

ஸ்ரீசரணாநாம் ஜயந்தீ ११.०२.२०२०

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

✆ 24951402

ஓ

THE SAMSKRIT EDUCATION SOCIETY (Regd) MADRAS

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

Secretary & Treasurer : **Sri G. SITHARAMAN**, F.C.A.
Editor and Publisher : **S. SRINIVASA SARMA**
Associate Editor : **Dr. G. Sankaranarayanan**
Department of Sanskrit,
SCSVMV Univeristy, Enathur,
Kanchipuram, Tamilnadu
Cell : 99941 03957

1.	ஸ்ரீமதி சாந்தா ஸ்ரீநிவாஸன், ஆழ்வார்ப்பேட்டை	98843 [illegible]4
2.	ஸ்ரீமதி சாந்தி அசோக், மந்தைவெளி	24951402
3.	ஸ்ரீமதி கௌரீ கருணாகரன், மைலாப்பூர்,	24620544
4.	ஸ்ரீமதி ரமாசுந்தரராஜன், சென்னை -95,	65687635
5.	ஸ்ரீமத் பார்வதீ ராமசந்திரன் அண்ணா நகர்	26215719
6.	ஸ்ரீ R. முத்து கிருஷ்ண ன் கொரட்டூர்	26872430
7.	ஸ்ரீ S. ரங்கநாத சர்மா, சேலையூர்	22291720
8.	ஸ்ரீமதி புவனேச்வரீ ராஜகீழ்பாக்கம்	9841212047
9.	ஸ்ரீ K. ராஜேச்வரீ மாடம்பாக்கம்	9962837319
10.	ஸ்ரீ S. ஹரிஹரன் நங்கைநல்லூர்	9841403859
11.	ஸ்ரீ S. அனந்தன், மதுராந்தகம்	9894709418
12.	ஸ்ரீ P.R. சுப்ரமண்யம், முகிலவாக்கம்	42649052
13.	ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய ஸ்ரீரங்கம்	2430632
14.	ஸ்ரீமதி ராஜம் சுந்தர், திருநெல்வேலி	9488326850
15.	ஸ்ரீ P.D. ஸ்ரீநிவாஸன், திருநின்றவூர்	9445703470
16.	ஸ்ரீ R. ரங்கநாதன், காஞ்சீபுரம்	97910 55428
17.	ஸ்ரீ C.A. ஏகாம்பரம், கோயம்புத்தூர்	0422-2233242
18.	ஸ்ரீமதி டி.வி. ஜயலஷ்மி சர்மா, புன்குன்னம், த்ரிசூர்-680 002,	0487-2382964
19.	ஸ்ரீமதி கௌரிவேங்கடராமன், காட்கோபர், Mumbai East	09757115154

ஸ்ரீ வி. கோதண்டராமன், Mrs. கீதா ரேகா,ஆதம்பாக்கம் 9444469638.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्रीः

माला : ४२ FEBUARY 2020 पुष्पम् : ०२

कलि : ५१२१ विकारी - कुम्भमासः ४२-०२

The Samskrit Education Society Established with the blessings of His Holiness **SRI MAHASWAMIGAL** of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:
Old 212/13-1, St.Mary's Road,
Mandaiveli, Chennai – 600 028.

PRESENT ACTIVITES
1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI Founder Editor
Vaidyasri
Dr. S.V.RADHAKRISHNA SASTRI

Hon. Editor
Dr.N.VEEZHINATHAN

Editor and Publisher
Dr. Prof. S.SRINIVASA SARMA

Associate Editor
Dr. G. SANKARANARAYANAN

Hon. Academic Advisors :
Dr.K.SRINIVASAN,
K.S.R.I.Chennai.
SMT. SANTA SRINIVASAN, SES,
Chennai.

Associate Editors :
Pandit S. Ranganatha Sarma,
Chennai.
Prof. G. Srinivasu, Kanchipuram.
Prof.C.V.Seshadri, Chidambaram.

Technical Assistants :
Dr. V. NAGARAJAN
Dr. S. THIAGARAJAN

१. सम्पादकीयम्	४
२. जयघोषः	५
३. बालीप्रत्यभिज्ञानशतकम्	११
४. रघुवंशम्	१३
५. अष्टाङ्गहृदयम्	१४
६. मन्त्रार्थचिन्तनम्	१५
७. तिरुक्कुरल्	१७
८. रूपकावली	१९
९. योगरहस्यम्	२१
१०. श्रीकृष्णचरितम्	२४
११. त्रिविधमौषधम्	२७
१२. शास्त्रं ज्योतिःप्रकाशार्थम्	२९
१३. श्रीमहास्वामिनां वचः	३३
१४. महाभारते वेदान्तविचारः	३७
१५. वेदान्तसिद्धान्तमुक्तावली	३९
१६. बालकथा	४३
१७. Hindu Concept of Law	४५
१८. पदरञ्जनी	४८

SUBSCRIPTION RATES

ANNUAL : Rs. 40/-LIFE
SUBSCRIPTION : Rs. 400/-PAGE
DONATION : RS.200/-
Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Samskrita Education Society.

DD/Cheque should be sent by Speed Post only

The Samskrit Education Society (Regd.),
Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai - 600 028.
Ph: 044 - 24951402 / Email: editorsamskritasri@gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सम्पादकीयम्

सत्काव्यसन्दोहपवित्रिताङ्गा
विज्ञानसन्दीप्तिविभूषणाढ्या।
विद्वद्घृदां मोदभरं दिशन्ती
श्रीसंस्कृतश्रीः जयताद्यशश्श्रीः।।

महताममलवचनमामलकनीकाशम् आरम्भकषायितं मधुरितान्तश्चेति प्रत्यक्षतोऽवलोक्यते। किन्त्वाधुनिकाः युवकाः वृद्धवचनं तुच्छं मत्वा यथेच्छं विहरन्तः चित्तदार्ढ्यं परित्यजन्ति। क्षुद्रसमस्याभिरप्यभिहताः आत्महत्यापर्यन्तं चिन्तयन्तः आत्मतत्त्वमपरिगण्य अल्पस्य हेतोः वेदनामनुभवन्ति। जीवतस्य परं पारं दृष्टवद्भिः महद्भिः समस्यानां क्षणिकत्वं सुखदुःखयोः पर्यायेण चक्रवद्भ्रमणञ्च लक्षितवद्भिः क्रियमाणानामुपदेशानां न कोपि ग्राहकः।

न संशयमनारुह्य नरो भद्राणि पश्यति।
संशयं पुनरारुह्य यदि जीवति पश्यति।

इति महाभारतवचनमत्र प्रमाणम्। अतः महतां जीवनपारदर्शिनां वाक्यानि चित्तदार्ढ्यप्रदानि व्यसने अभ्युदये च चित्तस्थिरीकरणपराणि इत्यवगन्तव्यम्। महतामुपदेशाः जीवतस्यैव मार्गदर्शका इति ज्ञात्वा आदरणीयाः वन्दनीयाश्च ते। बुद्बुदायमाने जीविते चित्तस्थिरीकरणमेव इदानीन्तनयुवकानामपेक्षितं भवति। तदेतन्मनसि निधाय युवकाः जीवतस्य पारदर्शिनां महतामादरं प्रदर्श्य तदुदितानि वाक्यानि जीवनसाफल्याय प्रयुञ्जन्त्वित्याशास्ते सम्पादकवर्गः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

जयघोषः

JAYAGHOSHA

(of Sri Kanchi Kamakoti Peetham)
Translated by Sri. P.R. KANNAN
Mumbai

Introduction to Jayaghosha:

In the hoary Guru Parampara of Sri Kanchi Kamakoti Peetham, important traditions are followed in honour of Paramapujya Jagadguru Sankarcharya Swamiji during various religious activities at the Matham.

The Jayaghosha has been in vogue since centuries. The slokas are recited when Sri Swamigal embarks on Yatra, arrives at a venue, ascends Simhasana, during temple honours, Puja & Annadana.

जयघोषः (सर्वे नन्दन्ति)

पटु-पटह-भेरी-काहल-भाण्ड-कटक-निस्साण-वीणा-वेणु-मृदङ्गादि-सकल-वाद्य-विनोद-निखिल-वाद्यघोष-श्रवण-कान्दिशीक-विमत-बृन्दकोलाहल-पराक्स्वामिन्! जय! विजयीभव!

O Swamiji, delighting in different musical instruments like various types of mighty kettledrums, drums of many sizes and shapes including large, wheel-shaped drums, Nissanas, Vinas, flutes, Mridangas etc.! Listening to all the heavy sounds of the musical instruments (heralding

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

your arrival), the multitudes of opponents are running away, creating a din! Swamiji is coming out! May you be ever victorious!

सिंहासनारोहणकाले

काञ्चीपुराभरण-कामद-कामकोटिपीठाभिषिक्त-वरदेशिकसार्वभौम-सार्वज्ञशक्त्यधिगताखिल-मन्त्रतन्त्र-चक्रप्रतिष्ठित-विजृम्भित-चातुरीक-पराक्स्वामिन्। जय! विजयीभव!

O Swamiji, you are the ornament of the city of Kanchi; you are the bestower of all desired fruits; you are the emperor of great Gurus, anointed in the Kamakoti Peetham; your omniscience seen in mastery of the entire world of Mantras and Tantras emerges from the Srichakra established (by Adi Sankaracharya). Swamiji is coming out! May you be ever victorious!

जय! गोविन्दभगवत्पाद-पादाब्ज-षट्पद-जय! जीवपराभेद-वावदूकजगद्गुरो जय! भोबौद्ध-पाषण्ड-विध्वंसन-विचक्षण-जय! वेदान्तसिद्धान्तसिद्धाञ्जन-महामते-पराक्स्वामिन्! जय! विजयीभव!

Victory to you, who is the bee delighting in the lotus feet of Sri Govinda Bhagavatpada. Victory to Jagadguru, eloquent in elucidating the identity of Jivatma and Paramatma. Victory to you, who is splendid in exterminating the heresy of the

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Bauddhas. Victory to the great wise Guru, who has the collyrium of experience of the principles of Vedanta (for applying on to the eyes of his disciples).Swamiji is coming out! May you be ever victorious!

राङ्कवाच्छादन-देवालयप्रसादाद्युपहरणकाले

स्वस्ति श्रीभुवनत्रयार्चित-पदाम्भोजात-तादृङ्महातत्व-ज्ञान-निदान-शङ्करगुरोः छात्रक्रमाधिष्ठिते। काञ्चीमध्यग-शारदामठसुधीसिंहासने षण्मताचार्याराधितपादुको विजयते-विश्वाधिकोऽस्मद्गुरुः- पराक्स्वामिन्! जय! विजयीभव!

O Swamiji, may all be well with you, established in the line of disciples of Guru Sankara, the repository of the Knowledge of the Great Truth, springing from the lotus feet of Kamakshi, worshipped by all the three worlds. Our Guru victoriously adorns the lion-seat of the wise in the Sarada Matham in the middle of Kanchipuram, worshipping the Paduka of Adi Sankaracharya, who established the adoration of the six Divinities. Swamiji is coming out! May you be ever victorious!

यात्रादिप्रस्थानावसरे

प्रस्थानतूर्य-पटहानक-शङ्खभेरी-भंभंनिनाद-बधिरीकृत-दिक्तटीक-अभ्यर्णदेश-विनमन्नखिलावनीन्द्र-मूर्धन्य-रत्न-रुचि-रञ्जित-मञ्जुलाङ्घ्रे- पराक्स्वामिन्! जय! विजयीभव!

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

There is deafening sound of various musical instruments like Turya, drums and kettledrums and conches extending far in all directions at the time of your going out. O Swamiji, your enchanting feet are glorified by the shine of the gems in the crowns of kings of the entire world, who vie with one another in worshipping you. Swamiji is coming out! May you be ever victorious!

कुम्भीसंभव-डिंभजृम्भण-दृढाहंभावं, अम्भोनिधेः गाम्भीर्यं, कुलकुम्भिनीधरधृतिं, जम्भारि-सम्भावनाम्। अम्भोदोद्भट-नादमप्यहसन्, बंभम्यते सम्भ्रमात् भंभंभंभमितीड्य शंकरगुरोः जैत्राङ्क-शङ्खध्वनिः पराक्स्वामिन्! जय! विजयीभव!

The victorious sound, bham bham bham of conch of our Guru Sankara is so loud and overwhelming that it surpasses the resoluteness of sage Agastya when he destroyed the demon Vatapi, who tried to emerge from his stomach; the majesty of the ocean; the steadiness of the earth; the honour of Indra (who killed demon Jambha); and, the intense sound of the thunder of the clouds.Swamiji is coming out! May you be ever victorious!

पूजाकाले

अत्रैवर्गिक-सम्प्रदाय-पदवी-साम्राज्य-सिंहासने स्वैरारोहण-कर्म-जाङ्गिक-गुणग्रामाभिरामात्मने। वाणी-कर्णवतंस-

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

हल्लक-दल-द्रोणी-मिलद्वासना- तत्व-व्यञ्जक-वाङ्मुखाय-भगवत्पादाय मोदामहे पराक्स्वामिन्! जय! विजयीभव!

We are delighted at our Guru Sri Bhagavatpada, whose flood of enchanting virtues has elevated him to the lion-seat of the emperor of the Path of Moksha beyond the three paths (of Dharma, Artha and Kama); and, whose speech, reaching our ears, elucidates the Truth by the attractive mix of the red lotus petals (sweetness and fragrance).Swamiji is coming out! May you be ever victorious!

अन्नदानसमाराधनादिकाले

नित्यान्नदान-लसमान-घनापदान-गानावादन-भृशविस्मयमानलोक। भक्तिप्रकर्ष-परिपूजित-चन्द्रचूड-कारुण्यलब्ध-निखिलाभिमतार्थसिद्धे- पराक्स्वामिन्! जय! विजयीभव।

O Swamiji, who gives a look of great appreciation at the lofty and brilliant work of daily Annadana to the accompaniment of singing; who has attained all desired objects through the grace of Sri Chandramouliswara, worshipped with deep bhakti.Swamiji is coming out! May you be ever victorious!

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पूजासमाप्तिकाले

कामपरिपन्थिकामिनि कामेश्वरि कामपीठमध्यगते।
कामदुघा भव कमले कामकलेकामकोटि कामाक्षि।।

O Kamakshi, the consort of the enemy of Manmatha; Loving Devi; Kameswariin the middle of Kamapitha; Kamala; Kamakala; Kamakoti; be the bestower of desired objects.

जय जय जगदम्ब शिवे जय जय कामाक्षि जय जयाद्रिसुते।
जय जय महेशदयिते जय जय चिद्गगन-कौमुदीधारे।।

Victory to Mother of universe; the ever Auspicious; Kamakshi; the daughter of Himavan; the consort of Maheswara; the Moon in the sky of Consciousness.

महात्रिपुरसुन्दरीरमण-चन्द्रमौलीश्वर-प्रसादपरिलब्ध-वाङ्मय-विभूषिताशान्तरम्। निरन्तरमुपास्महेनिरुपमात्म विद्या-नदीनद-पतिप्रभं मनसि शङ्करार्यं गुरुम् पराक्स्वामिन्! जयविजयीभव।

We constantly worship in our minds Guru Sankaracharya, whose brilliant speech emerges from the grace of Sri Chandramouliswara, sporting with Sri MahaTripurasundari, and bears the glory of the ocean of unparalleled Atmavidya. Swamiji is coming out! May you be ever victorious!

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बालीप्रत्यभिज्ञानशतकम्

Prof. ABHIRAJA RAJENDRA MISHRA
Formerly Vice-Chancellor, Varanasi

ततश्चतुष्पथे रम्ये राजसौधाजिराङ्गणे।
कृतघोषाभिधं राज्ञां दृश्यते न्यायमन्दिरम्।।८१।।

सौधच्छद्यन्तरे भागे पीनदारुविटङ्ककके।
कृष्णायनककवीनं प्रयत्नैर्यत्र चित्रितम्।।८२।।

अथाऽपरेऽपि प्रासादे नारकी यातनाऽखिला।
चित्रिता दृश्यते भूम्ना पापिनां भयकारिणी।।८३।।

मध्ये चतुष्पथं प्रांशुर्विष्णुर्गरुडवाहनः।
ग्यान्यारनगरे रम्ये सुदूरादेव लक्ष्यते।।८४।।

ग्रामे ततः कुतर्याख्ये महिषासुरमर्दिनी।
महादुर्गा पराम्बाऽसौ राजते चारुशृङ्गके।।८५।।

राज्ञी महेन्द्रदत्ताख्या धर्मोदयनवल्लभा।
स्थापिताऽऽम्बास्वरूपेण बाल्यामिति जनश्रुतिः।।८६।।

पयाङ्गनाभिधो ग्रामः पार्श्व एव विराजते।
प्राक्तनी राजधानी सा साम्प्रतं प्रकृतिङ्गता।।८७।।

चतुर्दशशते ख्रैस्ते महामात्यो गजह्मदः।
अत्र संस्थापयामास बालीद्वीपे द्विजेश्वरान्।।८८।।

कुतर्या दक्षिणे भागे ग्रामो ब्लह्बाटुहाभिधः।
यत्र केबो इबो जातो महाशक्तो महापतिः।।८९।।

विद्यया वपुषा बुद्ध्या शौर्यविक्रमसम्पदा।
रत्नभूमिं प्रभुं स्वीयं यस्सिषेवे प्रजानुगः।।९०।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रलोभ्य तं महावीरं यवान्नीत्वा गजह्वदः।
घातयामास निर्वैरं वैरी वङ्यंत्रपारगः।।९१।।

पुरा गाडुहिति ख्याते प्राक्तने ग्राममन्दिरे।
बालीमहापतेस्तस्य चैत्यमद्यापि राजते।।९२।।

दारुवक्त्राकृतिः प्रत्ना रक्षिता मन्दिरान्तरे।
ग्रामे गजह्वदस्यापि महाशक्तिमयी किल।।९३।।

इदानीमपि यां द्रष्टुं राजतन्त्रविशारदाः।
जकार्तानगराद् बालीं समायान्ति हितार्थिनः।।९४।।

डेन्पसारपुरात्प्राच्ये सानुराख्योऽम्बुधेस्तटः।
नूसादुआभिधो याम्ये वारुणे च कुटाभिधः।।९५।।

अत्र सागरकल्लोलमेदुरे सैकते तटे।
कामिनो ननु सेवन्ते चारुकन्दर्पकाहलीम्।।९६।।

सानुरे सूर्यसम्पातं सूर्यास्तं च कुटाम्बुधौ।
प्रत्यहं द्रष्टुमायान्ति पौराश्चापि सहस्रशः।।९७।।

चापाकृतिं कुटासिन्धुर्लभते वीचिसायकः।
घनकान्तारवीथीभिः संश्लिष्टोऽनुतटांकितः।।९८।।

दक्षिणस्यां धनुष्कोटौ सुधापाषाणपृष्ठके।
मन्दिरम् उलुवाट्वाख्यं राजते वनराजिषु।।९९।।

महापण्डितनीरार्थैः स्थापितं ख्रिस्तषोडशे।
ब्रुवन्त्येकेऽपरे किन्तु मेङ्गवीस्थनृपैरिति।।१००।।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रघुवंशम्

Sri. R.RANGANATHAN,
Sanskrit Education Society, Kanchipuram

द्वादशसर्गः नवसप्ततितमः श्लोकः

स नादं मेघनादस्य धनुश्चेन्द्रायुधप्रभम् ।
मेघस्येव शरत्कालो न किञ्चित्पर्यशेषयत्।।

पदच्छेदः सः, नादं, मेघनादस्य, धनुः, च, इन्द्रायुधप्रभम्, मेघस्य, इव, शरत्कालः, न, किञ्चित्, पर्यशेषयत्।

शब्दरूपाणि

सः	-	दका. पुं. प्र. एक।
नादं	-	अका. पुं. द्वि. एक।
मेघनादस्य, मेघस्य	-	रामशब्दवत्।
धनुः	-	धनुः, धनुषी, धनूंषि सका. नपुं. द्वि. एक।
च, इव, न, किञ्चित्	-	अव्य.
इन्द्रायुधप्रभम्	-	अका. नपुं. द्वि. एक।
शरत्कालः	-	रामशब्दवत्।
पर्यशेषयत्	-	पर्यशेषयत्, पर्यशेषयतां, पर्यशेषयन् परि इत्युपसर्गपूर्वक **शिष् - असर्वोपयोगे** इति धातोः णिजन्ते लङि प्र. पु. एक।

प्रतिपदार्थः - सः - அந்த லக்ஷ்மணன், शरत्कालः - சரத்காலமானது, मेघस्य इव - மேகத்தின் கர்ஜனையைப் போல், मेघनादस्य - மேகநாதனுடைய, नादं - வீரகர்ஜனை-யையும் इन्द्रायुधप्रभं - வானவில் போல் ப்ரகாசமான, धनुः च - வில்லையும், किञ्चित् न पर्यशेषयत् -சிறிதும் மிச்சம் வைக்கவில்லை.

भावार्थः सः लक्ष्मणः मेघगर्जनमिव शब्दवत् मेघनादस्य धनुः अपि भिन्नं कृतवान्।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अष्टाङ्गहृदयम्

Prof. S. SWAMINATHAN
Sri Jayendra Saraswathi Ayurveda College, Poonamallee

अयमेव विधिः कार्यः शिशिरेऽपि विशेषतः
तदा हि शीतमधिकं रौक्ष्यं चादानकालजम् १७

शिशिरे अपि - பின்பனிக் காலத்திலும், अयं विधिः एव - (முன்பனிக்காலத்தில் குறிப்பிடப்பட்ட) அதே குறிப்புகளையே, विशेषतः कार्यः - மிகவும் விசேஷமாகச் செய்து கொள்ளவேண்டும். हि तदा - ஏனென்றால் அப்பொழுது, शीतं अधिकम् - குளிர் அதிகமாகிறது, आदानकालजं रौक्ष्यं च - ஆதானகாலத்தினுடைய வறட்சியும் ஏற்படத் தொடங்குகிறது.

விளக்கம் - முன்பனிக்காலத்தைத் தொடர்ந்து வரக்கூடிய பின்பனிக் காலத்தில் குளிர் அதிகமாவதாலும், வறட்சியினுடைய ஆதிக்யம் தொடங்குவதாலும், முன்பனியில் குறிப்பிடப்பட்ட சட்டதிட்டங்களை மேலும் வலுவாகப் பயன்படுத்தி அந்த காலத்தில் ஏற்படும் குளிர் மற்றும் வரட்சியினுடைய தாக்கத்திலிருந்து பாதுகாத்துக் கொள்ளவேண்டும்.

कफश्चितो हि शिशिरे वसन्तेऽर्कांशुतापितः
हत्वाऽग्निं कुरुते रोगानतस्तं त्वरया जयेत् १८

हि शिशिरे चितः कफः - பின்பனிக்காலத்தில் தன்னிடத்தில் உறைந்து கபம் எனும் தோஷமானது, वसन्ते अर्कांशुतापितः- வஸந்தத்தில் வெயிலினுடைய சூடானது உடலில் படுவதால், உருகி, अग्निं हत्वा - பசித் தீயின் மீது விழுந்து அதை மந்தப் படுத்தி, रोगान् कुरुते - நோய்களை உருவாக்குகிறது, अतः तं - அதனால், உருகிய அந்த கபதோஷத்தை, त्वरया जयेत् - மிகவிரைவில் (உடலிலிருந்து) வெளியேற்றவேண்டும்.

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मन्त्रार्थचिन्तनम् - ३०

(आचार्योपदेशः- १)

Dr. M. JAYARAMAN

Krishnamacharya Yoga Mandiram, Chennai

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति।

सत्यं वद। धर्मं चर।

सायणभाष्यानुसारी मन्त्रार्थः

वेदोक्तकर्मानुष्ठानेन मानवमनसः परिपक्वता सिद्ध्यति। आत्मविषये विविदिषा उत्पद्यते। ततश्च क्रमेण ज्ञानं प्राप्य मोक्षभाग् भवति मनुष्यः। तदुद्दिश्य प्रथमसोपानभूतस्य कर्मानुष्ठानस्य महत्त्वं प्रख्यापयति अयं मन्त्रः।

आचार्यः शिष्यम् उपनीय वेदमध्यापयति। छात्रस्य ग्रन्थग्रहणसमाप्तौ अनुष्ठेयम् अर्थं ग्राहयति, अनुशास्ति आचार्यः। अनेन एतदवगम्यते यत् वेदाध्ययनात् परं धर्मजिज्ञासाम् अकृत्वा छात्रेण गुरुकुलात् न निवर्तितव्यम् इति।

एवं तर्हि अनुष्ठेयाः विषयाः के? सङ्ग्रहेण तत् कथ्यते - सत्यं वद। धर्मं चर इति। सत्यशब्देन न केवलं सत्यकथनं किन्तु अहिंसा, सत्यम्, अस्तेयं, ब्रह्मचर्यम् इत्यादि स्मृतिप्रसिद्धाः सदाचाराः, योगशास्त्रप्रसिद्धाः यमनियमाः ग्राह्याः। धर्मशब्देन च वेदोक्तानाम् अग्निहोत्रादीनां कर्मणाम् अनुष्ठानं कर्तव्यम्। तस्मात् सत्यादीनां स्मार्तानाम्, अग्निहोत्रादीनां श्रौतानां च कर्मणाम् अनुष्ठानम् अधीतवेदन च्छात्रेन कर्तव्यमिति समासतः अस्य मन्त्रभागस्य अर्थः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विवरणम्

मन्त्रार्थः तु विस्पष्टं सायाणाचार्यैः विवृतः। तत्र मन्त्रोक्तस्य अन्तेवासिपदस्य व्याख्यावसरे सायणाचार्याः **छायाभूतः अपरित्यागी नित्यमेव वसेद् गुरौ** इति स्मृतिवचनम् उद्धरन्ति। गुरुं यः छायेव अनुसरति, न कस्यामपि अवस्थायां परित्यजति सः अन्तेवासि-पदवाच्यः। अस्मिन् काले नितान्तं स्मर्तव्यः आचरणीयश्च शिष्यव्यवहारः अयम्। शिक्षकपदस्थाः अपि छायेव अनुसरतः शिष्यस्य शिक्षणानुकूलवृत्तवन्तो भवेयुः इति अर्थात् प्राचीनैः सङ्केतितम्। अयं प्रथमः अवधेयः विषयः।

द्वितीयः मननीयः विषयः अस्मात् मन्त्रभागात् एष अस्ति यत् - वेदाध्ययनं मन्त्रोच्चारणसामर्थ्यप्राप्त्या, ज्ञानप्राप्त्या वा न परिसमाप्यते। आधुनिकशैल्या वक्तव्ये - तत् शैक्षिकयोग्यताप्राप्त्या न अवसीयते। तत् जीवने अनुष्ठेयधर्मविषयकेन स्पष्टेन बोधेन एव समाप्यते। अतः वेद-संस्कृत-योग-शिक्षण-प्रदान-पराणां संस्थानाम् शिक्षकाः आर्षज्ञानप्रदानेन न, अपि तु तदनुकूलानुष्ठान-प्रेरणेन एव कृतार्था भवन्ति। अधुनिकाङ्ग्ल-शिक्षण-संस्थाभिस्तु वृत्तिजीवनेन सह सद्-वृत्त-मत्-छात्रनिर्माणं करणीयम्।

तदर्थम् आदर्शभूताः अद्यापि नितरां निष्ठया आर्ष-ज्ञान-विज्ञान-दानपराः गुरुकुलाचार्याः उपसर्पणीयाः। ईदृशं वैदिकं जीवनविज्ञानं च विनम्रतया तेषां सकाशात् अधीत्य आत्मसात्कर्तव्यम् इति दिक्।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्लोकानुरूपः - तिरुक्कुरल्

III. புணர்ச்சி மகிழ்தல் - संयोगसम्मोदः

श्रीकलियन् रामानुजजीयर् (भूतपूर्वः),
नाङ्गुनेरि

கண்டுகேட்டு உண்டுயிர்த்து உற்றறியும் ஐம்புலனும்
ஒண்டொடி கண்ணே உள.
लोचनश्रोत्ररसनानासिकात्वग्भिरिन्द्रियैः।
सुखानुभवयोग्यानां विषयाणामियं निधिः।।

பிணிக்கு மருந்து பிறமன் அணியிழை
தன்நோய்க்குத் தானே மருந்து.
व्याधीनां भेषजं लोके पृथगेव समस्ति नु।
औषधं स्वकृतव्याधेरियमेव सुभूषणा।।

தாம்வீழ்வார் மென்றோள் துயிலின் இனிதுகொல்
தாமரைக் கண்ணான் உலகு.
समर्पयन्त्या आत्मानं प्रियायाः कोमलांसके।
स्वादीयः शयनात्किं नु पद्माक्षस्य परं पदम्।।

நீங்கின் தெறூஉம் குறுகுங்கால் தண்ணென்னும்
தீயாண்டுப் பெற்றாள் இவள்.
विश्लेषे तापदं तीव्रं संश्लेषे शीतलं परम्।
अपूर्वदहनं ह्येषा कुतः प्राप्तवती सखे।।

வேட்ட பொழுதின் அவையவை போலுமே
தோட்டார் கதுப்பினாள் தோள்.
यथा स्वादूनि वस्तूनि कामनासमये तथा।
सुमसज्जितवेण्या हि मधुरोंसस्सदा मम।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

உறுதோறு உயிர்தளிர்ப்பத் தீண்டலால் பேதைக்கு
அமிழ்தின் இயன்றன தோள்.
अतिम्लानस्य विश्लोषान्मे समुज्जीवनादिह।
स्वस्पर्शाद्धि विमुग्धाया अंसः किं वा सुधाकृतः।।

தம்மில் இருந்து தமதுபாத்து உண்டற்றால்
அம்மா அரிவை முயக்கு.
प्रियाया रम्यवर्णाया आश्लेषस्तादृशो भुवि।
यज्ञशिष्टस्वयत्नाऽऽन्नभोजनं यादृशं गृहे।।

வீழும் இருவர்க்கு இனிதே வளியிடை
போழப் படாஅ முயக்கு.
अन्योन्यप्रेमसम्पूर्णमिथुनस्य परस्परम्।
गाढाऽऽश्लेषस्सुमधुरो दुर्भेदो मरुतापि यः।।

ஊடல் உணர்தல் புணர்தல் இவைகாமம்
கூடியார் பெற்ற பயன்.
प्रणयक्रोधविश्लेषस्संश्लेषस्तत्परं भवन्।
द्वावेतौ पूर्णकामस्य व्यूढद्वन्द्वस्य सत्फलम्।।

அறிதோறு அறியாமை கண்டற்றால் காமம்
செறிதோறும் சேயிழை மாட்டு.
ज्ञानवृद्धौ क्रमात्पूर्वमूर्खता ज्ञायते यथा।
समाभोगं समाभोगं प्रियां कामोऽपि तादृशः।।

(अनुवर्तते.....)

Articles for SAMSKRITASRI can be sent to:

editorsamskritasri@gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Digitized by eGangotri Sanskrit Collection. Vidwan Late Sri Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रूपकावली - नाचिकेतम्

Prof. VISHNU POTTY. V.S.
Kanchipuram

(वाजस्रवसस्य यागशाला ऋत्विजः आसने उपविशन्ति अर्घहस्तेन पुरुषेण अनुगम्यमानः पदव्यनुसारेण पूजां कृत्वा दक्षिणां ददन् वाजस्रवसः)

शिष्यः अञ्जलिना संसूच्य एते उत्तरतः समागताः महान्तः बहुयागकर्तारः भार्गवकुलप्रसूताः चतुर्वेदिनः करतलामलकवद्विलसत्सकलवेदवेदाङ्गाः अग्रपूजामर्हन्ति। अर्चयन्त्वैतान्। अनुग्रहञ्च स्वीकुर्वन्तु।

वाजस्रवसः पादौ उपस्पृश्य प्रक्षाल्य जलगन्धादिभिरभ्य अभिवादये वाजस्रवसोऽहम्। भवतां तुष्ट्यै गवां सहस्रं सुवर्णशतेन प्रतिज्ञाय भवन्तमाराधयामि। प्रतिगृह्णन्तु। अनुग्रह्णन्तु।

शिष्यः एते दक्षिणतः समागताः सन्ति। अनेकयागार्जितपुण्याः चतुर्वेदिनः विदितसकलशास्त्रार्थाः कश्यपकुलप्रसूताः यज्ञपत्युपाध्यायाः।

वाजस्रवसः पूजां विधाय दानतोयेन सुवर्णशतेन भवद्भ्यो गोसहस्रमुत्सर्जयामि। कृपया अनुग्रह्णन्तु।

यज्ञपत्युपाध्यायाः तथाऽस्तु।

शिष्यः एते पूर्वतः समागताः। सार्वभौमशर्माणः कविसार्वभौमाः गुरुकुलक्लिष्टाः आर्जितयशसः शास्त्रार्थे पराजितानेक-कुतार्किकाः पदवाक्यप्रमाणापारावारपारीणाः चतुर्वेदिनः। पूजयन्त्वैतान्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

वाजस्रवसः पूजां विधाय अहं वाजस्रवसः पुत्रः अभिवादये। सर्ववेदसि अस्मिन् मखे भवद्भ्यो गवां सहस्रेण सुवर्णशतं समर्पयामि। कृपया अङ्गीकृत्य मामनुगृह्णन्तु।

सार्वभौमशर्मा तथाऽस्तु।

शिष्यः एते तावद्विश्वविख्याताः सकलकलामर्मज्ञाः बहुशाखिनः विदितज्योतिश्शास्त्रनिगूढार्थाः पश्चिमदेशादागच्छन्ति। चतुर्वेदिनः सेमराजभट्टाः। दानेन तोषयन्तु।

वाजस्रवसः पूजां कृत्वा अभिवादये। उदकपूर्वकं गवां सहस्रयुक्तेन सुवर्णशतेन आराधयामि। प्रतिगृह्णन्तु।

सोमराजभट्टः तथाऽस्तु।

वाजस्रवसः कोऽत्र भोः मम सर्वस्वमानीयताम्। सर्वेभ्यो दास्यामि।

नचिकेताः पृष्ठतः आगत्य पितः। अहमपि सर्वसर्वान्तर्गतः किल।

वाजस्रवसः (स्कन्धं परिवर्त्य पृष्ठतोऽवलोकय) पुत्र। किं कथयसि। किं तवात्र कर्म।

नचिकेताः पितः अहमपि त्वदीयं किल धनम्। भवन्तः ऋत्विग्भ्यो सर्वस्वं ददति इति ज्ञातम्। अतः जिज्ञासितोऽस्मि कस्मै मां दास्यतीति।

वाजस्रवसः (कोपेन) किं कथयसि। अन्तश्चल।

नचिकेताः ननु मां कस्मै दास्यतीति।

वाजस्रवसः (अत्यन्तकोपेन) दानार्थं तव मृत्युरेव योग्यः। त्वां यमाय ददामि। शीघ्रम् इतो गच्छ।

नचिकेताः किं मृत्यवे।

वाग्रसवः मृत्यवे। मृत्यवे एव।

(सर्वे निष्क्रान्ताः)

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

योगरहस्यम् - ३०

Prof. S. VENUGOPALAN
SJSACH, Nazarathpet, Chennai

अस्मिन् तृतीये विभूतिपादे एतावता धारणाध्यानसमाधीनां त्रयाणां विषये अनेके अंशाः सविस्तरं विचारिताः। अन्ततः गते पर्याये चित्तस्य त्रिविधपरिणामविषये विचारयन्तः पूर्वं विचारितानां समाधि-एकाग्रता-अवस्थापरिणामानां चित्तधर्माणाम् आश्रयः धर्मी कीदृशः इति विचार्य, तत्र शान्तोदिताव्यपदेश्यधर्मानुपाती सः इति विदित्वा एकस्य तस्य धर्मिणः कथमनेके परिणामाः भवितुमर्हन्ति इति आशङ्क्य तत्र क्रमान्यत्वमेव परिणामान्यत्वे हेतुरिति तस्य समाधानं प्राप्तवन्तः। अत्र व्यासभाष्ये **निरोधकर्मसंस्काराः परिणामोऽथ जीवनम्। चेष्टाशक्तिश्च चित्तस्य धर्मा दर्शनवर्जिताः** इत्युक्तम्। दर्शनवर्जिताः इत्यनेन प्रत्यक्षगम्याः न इत्यर्थः अवगन्तव्यः। परोक्षाः इति यावत्। एतावता निरूपितस्य संयमस्य विषयप्रदर्शनद्वारेण सिद्धीः प्रतिपादयितुम् आरब्धं भगवता पतञ्जलिना। तदाह **परिणामत्रयसंयमात् अतीत-अनागतज्ञानम्** इति। अयमर्थः - धर्म-लक्षण-अवस्थाभेदेन यत् परिणामत्रयमुक्तं तत्र संयमात् तस्मिन्विषये पर्वोक्तसंयमस्य करणात् योगिनः अतीतानागतज्ञानं समाधेः आविर्भवति। अस्मिन् धर्मिणि अयं धर्मः इदं लक्षणम्, इयमवस्था च अनागताध्वनः समेत्य वर्तमानेऽध्वनि स्वं व्यापारं विधाय अतीतमध्वानं प्राविशति इत्येवं परिहृतविषयतया यदा संयमं करोति, तदा यत्किञ्चित् अनुत्पन्नं, अतिक्रान्तं वा तत्सर्वं योगी जानाति। यतः चित्तस्य सत्वप्रकाशरूपत्वात्

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सर्वार्थग्रहणसामर्थ्यं अविद्यादिभिः विक्षेपैः आक्रम्यते, अपक्रियते वा। यदा तु तैस्तैरुपायैः विक्षेपाः सर्वे ते परिह्रियन्ते तदा निवृत्तमलस्य इव आदर्शस्य सर्वार्थग्रहणसामर्थ्यम् एकाग्रताबलात् आविर्भवति। इदमेवंप्रकारेण अवगन्तव्यम्। तथा च अस्य धर्मिणः अयं धर्मपरिणामः, तस्य च अयं लक्षणपरिणामः, लक्षणस्य चायं नूतनपुराणाद्यवस्था-परिणामः इत्येवम् अनुक्षणं यत्रकुत्रचिदर्थे संयमात् साक्षात्कारे सति तदितरार्थानाम् अपि धर्मादिपरिणामेषु अतीतानागतज्ञानं सङ्कल्पमात्रेण प्रणिधानलेशादेन भवतीति। अत्र यद्यपि संयमस्य साक्षात्कारपर्यन्तता नोक्ता, तथापि **संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम्** इत्यागामिसूत्रात् सूत्रान्तरेष्वपि सा लभ्यते। अन्यविषयकसंयमात् अन्यविषयक-साक्षात्काराच्च शास्त्रप्रमाण्यात्। यागात् स्वर्गः इव। संयमेन स्वविषयविषयकसाक्षात्कारस्तु न तत्सिद्ध्यन्तःपाती, तन्नाम नात्र संयमसिद्धिषु मध्ये पद्यते, **क्षीणवृत्तेरभिजातस्येव मणेः.....** इत्यादि प्रथमेपादे संप्रज्ञातस्य फलत्वेनैव तस्य उक्तत्वात्। एवञ्च चित्तसत्त्वं निसर्गतः सर्वार्थप्रद्योतनस्वभावम्। तत्र रजस्तमोमलस्य प्रतिबन्धरूपस्य संयमेन प्रक्षये सति प्रमाणमनपेक्ष्य योगी सर्वं (अतीतानागतम्) जानाति इति भावः अवगन्तव्यः। अत्र परिणामत्रयसंयमस्य फलान्तरमप्युच्यते **शब्दार्थप्रत्ययानाम् इतरेतराध्यासात् सङ्करः, तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम्** अयमर्थः - गौः इति शब्दः, गौः इत्यर्थः। गौः इति प्रत्ययः इति पण्डितात् पामरपर्यन्तं सर्वेषां अपि शब्द-अर्थ-प्रत्ययानां इतरेतराभेदाध्यासात् सङ्करः प्रसिद्धः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एषां वर्णव्यङ्ग्यं पदं, पदव्यङ्ग्यं वाक्यम् शक्त्यादिवृत्त्या बोधकम् इति शब्दतत्त्वम्। अर्थो द्रव्यादिः वाच्यः लक्ष्यश्च इत्यर्थतत्त्वम्। शब्दजन्योऽर्थविषयः प्रत्ययः इति ज्ञानतत्त्वम् इति यः प्रविभागः शास्त्रयुक्तिभ्यां सिद्धः, तस्मिन् संयमात् सर्वशब्दादिवशीकारसूचकं सर्वभूतानां पशुपक्ष्यादीनां रुतज्ञानं तन्नाम पश्वादीनां यो रवः, पक्षीणामपि यो रवः स सर्वोऽपि सम्यक् बुद्ध्यते कमभिप्रायं ते अभिव्यञ्जते इति ज्ञानं योगिनः जायते इत्यर्थः। काकः कुतः रौति? शुकः किं वक्तुमभिलषति?, इयं गौः कुतः शब्दायते? इति सर्वं योगी ज्ञातुं प्रभवति। सामान्याः वयं यज्ज्ञातुं न प्रभवामः, यज्ज्ञातुं अस्माकं सामर्थ्यं नास्ति तत्सर्वं योगी ज्ञातुं प्रभवतीत्यर्थः। अस्य कारणं योगिनः चित्तं तथा योगाभ्यासेन संस्कृतं भवति, यस्य प्रभावात् अमानुष्यशक्तीः योगी समवाप्नोति इति अस्माभिः अवगन्तव्यम्। ईदृशाः योगिनः भारते एव प्रसिद्धाः। अस्माकं काञ्चीमहास्वामिनः श्रीरमणमहर्षयः इति अनेके योगीश्वराः गतशताब्द्यां स्थिताः, अन्येपि बहवः गुरवः अस्माकं समाजे वर्तन्ते इति यत् तत् अस्माकं गौरवस्य, सन्तोषस्य च विषयः।

इमाः विभूतयः आपादपरिसमाप्तेः वक्ष्यन्ते, विभूतयः अणिमादयः बहुप्रसिद्धाः। **अणिमा महिमा चैव गरिमा लघिमा तथा। प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः** इति अमरकोशश्लोकः इमाः सर्वाः विभूतीः परिगणयति।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कलिकल्मषघ्नं श्रीकृष्णचरितम् - ७

(वसुदेवचनेन देवक्याः वधोद्योगात्कंसस्य निवृत्तिः,
देवकीपुत्राणां कंसकर्तृको वधश्च)

Dr. M. VINOTH
French Institute of Pondicherry,

गतसञ्चिकायां भगवतः प्रभावं ज्ञात्वा वसुदेवेन प्रारब्धः स्तवः प्रतिपादितः। तस्यैवानुवर्तनमस्यामपि सञ्चिकायां क्रियते। एवं भवानेव जगत उत्पत्तेः कारणं सदपि तदप्रतिपादयन्निह वस्तुनि प्रविश्य विराजते इत्युक्त्वा अग्रे -

एवं भवान् बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः।
अनावृतत्वाद् बहिरन्तरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः।।

(श्रीमद्भागवतम् १०.३.१७)

इत्यादिना पुनः तुष्टाव। सङ्ग्रहेण वसुदेवकृतः स्तवः प्रतिपाद्यते। हे प्रभो, ज्ञानेन निरूपणींयस्वभावयुक्तेषु देवमनुष्यादिभूतेषु सन्नपि भवान् तासां विकारैरबाधितो भूत्वा नित्यशुद्धरूपो भवति। सर्वदा सङ्कोचरहितः ज्ञानविकासरूपश्च भवति। ज्ञानसङ्कोचस्तु कर्मभिः जीवानामेव भवति न कदापि भवतः। न तेऽस्ति बहिरन्तरं किञ्चित्। सर्वेषु आत्मवस्तुषु व्यापृतोऽसि। जगदिदं त्वमेव। सर्वमपि वस्तु भवच्छरीररूपमेव। देहस्य गुणाः आत्मसु न संभवेयुः। आत्मान एव अज्ञानेनावृतत्वाद् देहगुणान् स्वेषु आरोपयन्ति। तथैव पररूपात्मके भवति भवच्छरीररूपाणां चेतनाचेतनानां गुणाः न संभवन्ति। जगति दृश्यमानानि वस्तूनि परमात्मनः व्यतिरिक्तानि इति यः चिन्तयेत् सोऽबुधः। तमभिप्रायं दूषयितुं तस्योद्धरणमुचितं परं न कदाचिन्मनसापि

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तच्चिन्त्यम्। बुधैः इदमहितमिति निराकृतमेव तेन अबुधेन हितत्वेन स्वीकृतमस्ति। तस्मात्तदयुक्तमेव। भवतः सङ्कल्पं विना नान्यः व्यापारोऽस्ति। भवान् सत्त्वादिगुणरहितः निर्विकारस्वरूपश्च। तथाऽपि भवतः जगतोऽस्य सृष्टिस्थितिसंहाराः जायन्ते इत्युपनिषद आमनन्ति।

कथं निर्विकारस्य ब्रह्मणः सविकारत्वरूपजगत्कर्तृत्वं संभवेदिति चेत् - त्वदाश्रयत्वादिति विवृणोति। तदर्थः- तेषां सत्त्वादिगुणानाम् आश्रयत्वाद् ऐश्वर्यादिगुणपूर्वत्वाद् वा सगुण इति संभाव्यसे त्वम्। तादृशो भवान् त्रिलोकस्य रक्षणार्थं शुद्धसत्त्वरूपं शुक्लं, जगतः सृष्ट्यर्थं रजोगुणरूपं रक्तं, प्रलयार्थं तमोगुणरूपं कृष्णञ्च वर्णं बिभर्षि। हे सर्वेश्वर, जगद्रक्षणार्थं त्वं मे गृहे अवतीर्णोऽसि। राजन्यसंज्ञैरसुरैः प्रेरितं सैन्यसमूहं प्रमथयिष्यसि। हे देवदेव, अयम् असभ्यः कंसः त्वदवतारं ज्ञात्वा त्वत्पूर्वजान् अवधीत्। स्वपुरुषैः त्वज्जन्मापि ज्ञात्वा अधुनैव उदायुधस्सन् अभिसरेदित्येवं सर्वम् अकथयत् वसुदेवः।

ततः देवकी महापुरुषस्य असाधारणविलक्षणानि चतुर्भुजत्वादीनि वीक्ष्य स परमपुरुष एवेति ज्ञात्वा कंसाद् भीता अपि शुचिस्मिता सन्ती भगवन्तम् अस्तौत्। तत्प्रसिद्धं यद्वैदान्तिकसमधिगम्यं परमात्मस्वरूपं स एव त्वमित्यादिरूपेण अस्तौत्। यच्च स्वरूपम् इन्द्रियैर्ज्ञातुम् अशक्यं, प्रपञ्चोत्पत्तेः पूर्वमेव विद्यमानं सन्नाशरहितञ्च भवति, सत्त्वादिगुणैरस्पृष्टं नाम निर्गुणं, वृद्धिक्षयरहितं, निर्विकारम्, आकाशादिभूतानां विशेषरहितं नाम निर्विशेषं, स्वयंप्रकाशं, शोकमोहादिविकाररहितं, पुण्यपापरूपव्यापाररहितं, वेदान्तैः प्रतिपाद्यमानं नित्यज्ञानरूपञ्च भवति तादृशं परमात्मस्वरूपं त्वमेवासि। द्विपरार्धावसाने

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

लोके नष्टे सति तादृशे प्रलयकाले सर्वमपि व्यक्तं कालवेगेन अव्यक्ते लीनं भवति, तदपि भवति लीनं भवति। तदा ब्रह्मप्रलयकाले भवानेक एव शिष्यते यश्च शेषसंज्ञः भवति। निमेषादारभ्य संवत्सरपर्यन्तं विद्यमानोऽयं कालः ब्रह्मादीनपि नियन्त्रयति। तादृशेन कालेनैव खलु भवान् जगतः सृष्टिस्थितिप्रलयात्मकं कार्यं चालयति। तमेव कालं भवतः चेष्टा इति कथयन्ति। तादृशस्य कालस्य नियन्तारं क्षेमदञ्च भवन्तं शरणं गच्छामि। मरणशीलः पुमान् संसाराद्भीतस्सन् सर्वान् लोकान् प्रति पलायमानः सर्वान् उपायान् अनुतिष्ठन्, संसारान्मुक्तिं न प्राप्नोति। यदृच्छया सुकृतविशेषपरिपाकेन त्वत्पादाब्जं प्राप्य स्वस्थो नाम् संसाराख्यान्महासर्पात् जातेन भयेन रहितो भवति। तादृशो भवान् घोराद् उग्रसेनात्मजात् कंसाद् अस्मान् पाहि। यतः भवान् भवद्भृत्यानां भयापहर्ता असि। एवं स्तुतिं कृत्वा पुनश्च अकथयत् - परमपुरुषासाधारणं यद्रूपमिदं योगिनां ध्यानैकगम्यं तादृशं स्वरूपं मादृशां मांसचक्षुषां प्रत्यक्षं मा कार्षीः। हे मधुसूदन, पापिष्ठोऽयं कंसः मयि जातं तव जन्म न जानातु नाम। धैर्यरहिताहं तव जन्मोद्दिश्य कंसाद्भीता अस्मि। हे विश्वात्मन्, शङ्खचक्रगदापद्मश्रिया जुष्टं चतुर्भुजम् इदम् अलौकिकं रूपं तिरोधापय इति भगवन्तं प्रार्थितवती। किञ्च उक्तवती- जगत्सृष्टेः पूर्वदशायां तव नाभिकमले समस्तं प्रपञ्चममुं स्वयं धरते। तादृशो भवान् मद्गर्भसम्भूत इति भवतः जन्मेदं नृलोकस्य विडम्बनमेव नाम मनुष्यलोकरीतिम् अनुसृत्य कृतं कर्मैव इति नान्यत्कारणमत्र दृश्यते। अहो, आश्चर्यमेतस्य भगवतः माहात्म्यमिति विस्मयङ्गता च।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

त्रिविधमौषधम् - १७

Sri.S.BALASUBRAMANIAN
Ms. B. RENGA PADMINI
IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

देवब्रह्मर्षिभिः प्रोक्ता मन्त्राः सत्यतपोमयाः।
भवन्ति नान्यथा क्षिप्रं विषं हन्युः सुदुस्तरम्।।
विषं तेजोमयैर्मन्त्रैः सत्यब्रह्मतपोमयैः।
यथा निवार्यते क्षिप्रं प्रयुक्तैर्न तथौषधैः।।

(सु.क.५/९,१०)

अतः मन्त्रस्य फलं संपूर्णतया प्राप्तव्यमिति चेत् किं किं करणीयमिति पश्यामः।

मन्त्रणां ग्रहणं कार्यं स्त्रीमांसमधुवर्जिना।
मिताहारेण शुचिना कुशास्तरणशायिना।।
गन्धमाल्योपहारैश्च बलिभिश्चापि देवताः।
पूजयेन्मन्त्रसिद्ध्यर्थं जपहोमैश्च यत्नतः।।

(सु.क.५/११,१२)

गदमिति विषम्। अगदं नाम यत् गदं शमयति; अथवा गदाय हितं अगदं, विविधविषोपहरणाय कल्पितानि भेषजानीत्यर्थः। विषशमनायौषधकल्पनासमयेऽपि मन्त्रः उच्चरणीयः।

यथा-चन्द्रोदय-अगदम्

चन्द्रोदयकल्पनसमये अमुं मन्त्रं भिषगुच्चरेत्।

नमः पुरुषसिंहाय नमो नारायणाय च।
यथासौ नाभिजानाति रणे कृष्णपराजयम्।।

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एतेन सत्यवाक्येन अगदो मे प्रसिद्ध्यतु!
नमो वैडूर्यमात्रे हुलुहुलु रक्ष मां सर्वविषेभ्यः।
गौरि गान्धारि चाण्डालि मातङ्गि स्वाहा।।
हरिमायि स्वाहा!

महागन्धारी नाम अगदोऽपि कल्पनाय समयेऽपि अन्य मन्त्रः उक्तः विशेषेन मन्त्राणां प्रयोगं सर्पादिदंशानन्तरं धमनीबन्धनाय उक्तम्। उक्तं हि चरके-

मन्त्रैर्धमनीबन्धोऽवमार्जनं कार्यमात्मरक्षा च।
दोषस्य विषं यस्य स्थाने स्यात्तं जयेत्पूर्वम्।।

(च.चि.२३/६१-६४)

उक्तं च सुश्रुते-

अरिष्टमपि मन्त्रैश्च बध्नीयान्मन्त्रकोविदः।
सा तु रज्ज्वादिभिर्बद्धा विषप्रतिकरी मता।। (सु.क.५.८)

मन्त्रस्य फलं औषधात् न प्राप्तुं शक्यते। तथैव न केवलं मन्त्रप्रयोगः कृत्स्नफलदः स्यात्। यद्येवं स्यात्तर्हि मन्त्रकथनानन्तरं पुनः २३ चिकित्साप्रकरणानि किमर्थम् उक्तानि -

सुश्रुते उक्तम् -

मन्त्रास्त्वविधिना प्रोक्ता हीना वा स्वरवर्णतः।
यस्मान्न सिद्धिमायान्ति तस्माद्योज्योऽगदक्रमः।।

(सु.क.५/१३)

इति वयम् अगदतन्त्रे मन्त्राणां प्रयोगान् दृष्टवन्तः। अग्रिमप्रस्तुतौ वयं रसायनवाजीकरणतन्त्रयोः मन्त्राणां प्रयोगान् पश्यामः।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

शास्त्रं ज्योतिः प्रकाशार्थम् - १४

Ms. DHWANI J.

IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

भयं, चिन्ता, क्रोधः, धूमः, व्यायामः, उपवासः, असुखा शय्या चेति इमे भावाः निद्रां बाधन्ते इति विषयमुक्त्वा गतमासे अस्माभिः विरामः कृतः। अधुना इमे हेतवः विस्तृतीक्रियन्ते। एतेषां हेतूनां विशेषतया पृथक्कथनं तु एषां सांप्रतिके अतिप्रसक्तित्वादेव। एकैकं विचारयामः।

तत्रादौ भयमिति। तत्र भयलक्षणमुच्यते - **रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम्** इति साहित्यदर्पणे। रौद्रं तु रुद्रस्य भावः। रोदयतीति रुद्रः। ये ये भावाः मनुष्यान् प्रायेण रोदयन्ति, तैर्जनितो मनोभावः भयाख्यः स्यात्। सामान्यतया पश्यामः चेत् भूलोके विविधाः भीतयः प्रादुर्भवन्ति। कार्यक्षेत्रेषु विद्यालयादिज्ञानक्षेत्रेषु वा औन्नत्यं प्राप्येत इति भीतिः, न प्राप्येत चेत् तत्परिणामाः कीदृशाः स्युरिति भीतिः, पुनश्च तत्परिणामसंमुखीभवनविषये विचिन्त्यैव भीतिः, मद्विषये परे किं ब्रूयुः किं वा चिन्तयेयुः इति भीतिः, मनसि सङ्कल्पितं लक्ष्यं यदि न लभ्येत चेत्तर्हि अग्रे किं भविष्यतीति भीतिः। एवं सामान्यमनुष्यजीवने विविधाः भीतयः संभवन्ति। एतदतिरिच्य वैद्यकीयक्षेत्रे काचित् भीतयः Phobia संज्ञकाः सन्ति। तास्तु नानाप्रकाराः सन्ति - तासु काश्चित् श्रुत्वैव कदाचित् तदपीडिताः हसेयुः, किन्तु सत्यमेव तदार्ताः महत्पीडां सहन्ते इति श्रूयते। सर्व एवामी भावाः रोदयितुं समर्थाः इति ते सर्वे रौद्रभावयुक्ताः सन्ति, तेन च रोद्रभावेन भयाख्यं चित्तवैक्ल्व्यमुत्पद्यते इति सर्व एते भावाः भयोत्पादकाः। कलौ खलु युगेऽस्मिन् सर्व एव जनाः शीघ्रं शीघ्रं धावन्ति। अत्रैव औन्नत्यप्राप्त्यर्थं गरीयसी तृष्णा वर्तते, तया च जनानां परस्परं स्नेहः हीयमानः दृश्यते। द्वाभ्यामप्यमूभ्यां हेतुभ्यां भयवृद्धिस्तु

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भवत्येव, तदतिरिच्य भवनाशकभावाः धर्म-दया-क्षान्ति-चित्तैकान्ततादयः अपि अनुदिनं क्षीयमाणाः सन्ति। भयेन वातवृद्धिर्भवतीति आयुर्वेदेन दर्शितम्। तया च वातवृद्ध्या निशि निद्रा नश्यति। भयेन जनितं निद्रानाशं जेतुं लौकिकक्षेत्रेषु सामञ्जस्यप्राप्तये यत्नः विधेयः। तदतिरिच्य प्राणायामादिवातनिरोधाभ्यासाः अपि सेवनीयाः। उक्तं हि हठयोगप्रदीपिकायां - **चले वाते चलं चित्तं निश्चले निश्चलं भवेत्** इति। अपि च यदि आवश्यकं मन्येत तर्हि भयजयार्थं वैद्यसहायस्वीकरणे न लज्जा करणीया, यतो हि उपेक्षिता मनोभीतिः विविधान् रोगान् उत्पादयेत्, अपि च, मा भूत्, प्राणघातायापि कल्पेत।

चिन्ता नाम आध्या, ध्यानमिति शब्दकल्पद्रुमः। सैषा चिन्ता आयुर्वेदे बहुत्र वर्णिता भवति। उदाहरणार्थं - स्थौल्यहरणार्थासु चिकित्सासु अन्यतमत्वेन चिन्ता उक्ता। एकस्मिन् विषये मनसः एकाग्रता चिन्ता उच्यते। सेयं चिन्ता सुफलाय दुष्फलाय वा भवितुमर्हति, चिन्त्यविषयप्रभावात्। कथमपि, चिन्ता वातवृद्धिकृत् एव। शुभचिन्ता अपि सुखनिद्राप्राप्त्यर्था परिमिता एव स्यादिति भावः। संप्रति तु विविधान् विषयानधिकृत्य लौकिकैः चिन्ता क्रियते। अपि च अनुचितविषयाः अत्र बहवः सङ्गताः सन्ति। **चिन्ताग्रस्तचित्तत्वात् निद्रानाशो मम** इति बहवो बहुधा बहुत्र बहुदा च कथयन्त्येव। अतः कुत्र चिन्ता विधेया, कियती च तत्रापेक्षिता इति सम्यक् विचार्यैव चिन्ता परिमितमात्रया करणीया, अन्यथा तु सा निद्रानाशायैव।

क्रोधः इति। क्रोधः इत्यस्य एकादश नामानि शब्दकल्पद्रुमे दत्तानि - हरः, हृणिः, त्यजः, भामः, एहः, ह्वरः, तपुषी, जूर्णिः, मन्युः, व्यथिः इति। धूमः इति। धूनोति धूयते वेति धूमः (शब्दकल्पद्रुमः)। एषु कानिचन पदानि विशेषतया पश्येम। हृणिरिति शब्देन निन्दार्थः ग्राह्यः। त्यजः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इत्यनेन हानिः दर्श्यते। भामः क्रोधपर्यायमात्रः। जूर्णिरिति ज्वरवाचकः। तपुषीति तापवाचकः। मन्युः इति शोकवाचकः। व्यथिरिति दुःखवाचकः। सर्वाण्यप्येतानि पदानि क्रोधस्य हेयत्वं स्पष्टं दर्शयन्ति। क्रोधस्य शरीरप्रभावस्तु ज्वरोत्पत्तिकथा एव उच्चैः घोषयन्ती वर्णयति। दक्षयज्ञे रुद्रभागः न दत्तः इति हेतोः रुद्रस्य महान् क्रोधः अभूदिति कथाऽरम्भः। तस्य क्रुद्धस्य रुद्रस्य निश्श्वाससंभवः ज्वरो नाम घोररूपी कश्चित् **त्रिशिरा नवलोचनः ज्वालामालाकुलो रौद्रः ह्रस्वजङ्घोदरश्च।** सः रुद्रं दृष्ट्वा अपृच्छत् - **अहं किं करवाणि ते** इति। तदा च रुद्रोऽवदत् - **ज्वरो लोके भविष्यसि** इति। कथायामस्यां तु बहवो गूढार्थाः विव्रियन्ते विद्वद्भिः चर्चासु। तत्र प्रासङ्गिकस्तु अयं भवति यत् - क्रोधः एव रोगाणां मूलहेतुः इति। अपि च ज्वराद्विना मृत्युर्नास्तीति कथ्यते। सोऽयं ज्वरः क्रोधोत्पन्नः एव। क्रोधस्यैवं प्रभावोऽस्ति - क्रोधेन रोगाः, मृत्युः, प्रलयो वापि संभवितुमर्हति, किं पुनः निद्रानाशः! क्रोधेन रजोगुणवृद्धिर्भवति, येन निद्रानाशः निस्संशय एव। सांप्रतिके च क्रोधवशात् लोके बहुधा कलहाः समुत्पद्यमानाः दृश्यन्त एव। तैरपि बहूनां निद्रा नश्यति। क्रोधवशीकरणविषये बहुविधा यत्नाः सार्वजनिकरूपेण लोके विधेयाः, यतो हि क्रोधः लोकेऽधुना महत्समस्यारूपेण तिष्ठति।

धूमः इति। स तु आर्द्रेन्धनप्रभवः इति शब्दकल्पद्रुमः। धूमस्तु नगरादिमार्गेषु प्राणीनां स्वास्थ्यस्य, जनानां भ्रमणधारायाश्च महान् विघ्नः भवतीति न वक्तव्यमेव। सोऽयं धूमोऽपि निद्रानाशाय कल्पते इत्यायुर्वेदः। अपरं तु धूम्रपानमप्यत्र ग्राह्यः। आयुर्वेददिनचर्यायां कश्चित् धूमपानविधिरुच्यते। स त्वत्र स्वास्थ्यहितकारित्वान्न ग्राह्यः। वाहनादिधूमविषये न केवलं सर्वकारेण अपि तु प्रत्येकं जनेन श्रद्धा विधेया। धूम्रपानमपि एवम्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

व्यायामः इति। शरीरायासजनकं कर्म व्यायामसंज्ञितमिति व्यायामनिर्वचनम्। व्यायामेन निद्रानाशः भवति। तत्र ये अतिनिद्रया पीडिताः सन्ति ते मितं व्यायामं कृत्वा सौख्यमाप्नुयुः। ये तु पूर्वमेव सम्यङ्निद्रां निषेवन्ते ते अतिव्यायामेन निद्रानाशं प्राप्नुयुः। व्यायामोऽपि वातकारकः एव, अतः तस्य मात्रया सेवनं महत्त्वपूर्णं भवति। उपवासः इति। उपवासविषये किञ्चित् गतमासे चर्चितम्। तदतिरिच्य शरीरलङ्घनरूपोऽपि उपवासः संप्रति प्रासिद्ध्यं भजति। फलमात्रसेवनं (Fruit diet), जलमात्रसेवनं (Water diet), फलरसमात्रसेवनम् (Juice diet / fluid diet) इत्येवं विविधैः नामभिः विविधरूपाः उपवासाः नवा नवाः सेव्यन्ते। तेषु कति वस्तुतः एव स्वास्थ्यहिताय इति विचारणीयः एव। संप्रति कृशशरीरमेव सौन्दर्यदर्शकं (विशेषतः स्त्रीणाम्) इति विचारेण व्यायामोपवासौ तीव्ररूपेण क्रियमाणौ स्तः। यदि व्यायामः करणीयः चेत्, सः मितः स्यात्। उपवासः तु स्वधर्मोक्तविधिकृतः प्राचीनत्वात् सुविचारितः स्यादिति स एव श्रेष्ठः स्यादिति विचार्यते। अतिमात्रौ, अहितरूपौ वा व्यायामोपवासौ वातवृद्ध्ये, निद्रानाशायैव।

असुखा शय्या इति। असुखा शय्या इत्यत्र विचारणीया बहवो विषयाः सन्ति - कीदृशी खट्वा, कीदृशः पर्यङ्कः, कीदृशमुपधानं, शिरस्स्थापनार्था का दिक् इति। संप्रति तु निद्राकालः एव भूयः परिवर्तितः भवति, कुं पुनः शय्यादिविधानम्! एवंविधान् निद्रानाशकान् हेतून् विचार्य अस्माभिः सुखनिद्रा सेवनीया। यतो हि -

निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम्।
वृषता क्लीबता ज्ञानमज्ञानं जीवितं न च।।

इत्थं निद्राप्रसङ्गोऽस्माकमत्र समाप्यते। आगामिमासे नवं कञ्चित् विषयं समुद्धृत्य पुनरुपस्थास्यामः।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur

संस्कारः ஸம்ஸ்காரம்

(श्रीमहास्वामिनां वचःसमुद्धरणपूर्वकम्)

Dr. S. THIAGARAJAN
Department of Oriental Studies & Research,
SASTRA - Deemed to be Unviersity, Thanjavur

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ।
यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मविद्
यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ।।

(मनीषापञ्चकम् - ५)

सस्यगुच्छात् एकमात्रस्य सस्यस्य निष्काशनमिव यदि इन्द्रियाणि मनश्च निष्काश्य केवलात्मरूपे भवामः चेत् अयं सदानन्दः लभ्यते इति उपनिषदां वचांसि भवन्ति। तस्मै महद्धैर्यम् आवश्यकम्। नाहं शरीरम्, तस्य शरीरस्य सुखदुःखं मे नास्ति इति जीवावस्थायामेव चिन्तयितुं महद्धैर्यं भवेत्। चित्तशुद्धिं विना तन्न साध्यम्। चित्तशुद्धये एव कर्मणामनुष्ठानम्। एवं प्रकारेण एकं जीवं वेदमन्त्रैः परिशुद्ध्य तैः मन्त्रैः संयुतेषु कार्येषु प्रेरयितुमेव चत्वारिंशत् संस्काराः भवन्ति। तथा हि अद्वैतमुक्तये इमे प्राथमिकसोपानानि भवन्ति।।

अनेन कर्मानुष्ठानेन चित्तशुद्धिसंपादनमेव लक्ष्यं भवेत्। ततः शुद्धान्तःकरणं प्राप्य जीवः आत्मविचारं कृत्वा सदानन्दः इत्याख्यम् आत्मसाक्षात्कारं प्राप्नुयादिति श्रीशङ्करभगवत्पादानां सिद्धान्तः। कश्चित् इदं लक्ष्यमस्ति चेदपि तानि कर्माणि न त्यजन् संन्यासी भूत्वा ज्ञानविचारमकुर्वन् मृतः चेत् सः ब्रह्मलोकं

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

गच्छति इति महाप्रलयसमये चतुर्मुखब्रह्मा यदा ब्रह्मणि (परमात्मनि) ऐक्यमेति तदा सोऽपि अद्वैतमुक्तिमेति इत्यपि वदन्ति। ईदृशलक्ष्यहीनः केवलकर्मार्थमेव यः कर्म कुरुते सः देवलोकं प्राप्नोति। किन्तु तत्र निरन्तरम्। तथापि भूलोकवासक्लिष्टापेक्षया किञ्चित् कालोऽपि देवलोकवासः श्लाघ्य एव खलु! तत्रापि इमे संस्काराः एव प्रापयन्ति।।

त्रिविधाः लोकाः - மூன்று வித லோகங்கள்

देवलोकः, मनुष्यलोकः इत्याभ्यां नरकलोकः इति कश्चित् वदामः। संपूर्णोऽपि वासकालः सुखमयः भवति देवलोकः। सुखदुःखमिश्रितो मनुष्यलोकः। दुःखमयः अपि लोकः भवेत् खलु? स एव नरकलोकः। इह कश्चिन् महापापी नीचं परजन्म प्राप्तेः प्राक् स्वपापकर्मणः अत्यधिकदण्डरूपेण अत्र नरकलोकं गच्छति इति शास्त्रेषु भवति। तत्र अत्यधिकानि कष्टानि अनुभूय अत्यधिकं पापमपनीय पुनः भूलोकमागच्छति, पुनर्जन्म प्राप्नोति।।

सुखदुःखानि शीतोष्णानीव भवन्ति। समस्तोऽपि लोकः तापमानयन्त्रमिव (Thermo-meter) भवति।? तस्मिन् यत्र क्वथनाङ्कमानं (Boiling point) भवति तन्नरकलोक इव। हिमाङ्कमानं तावत् (Freezing point) स्वर्गलोकवत्। मध्यबिन्दुः भूलोकः इति गण्यते चेत् अत्र मध्यभागे-हिमाङ्कमानसमीपतः बाष्पाङ्कबिन्दुपर्यन्तं बहवोऽङ्कबिन्दवः भवन्ति। क्वथनाङ्कस्थाने शीतं नास्ति। हिमाङ्कमाने चोष्णं नास्ति। उभयोः मध्ये बहवोऽङ्कबिन्दवः भवन्ति। इदं मानत्रयं लोकत्रयस्योपमानमिति वक्तुं शक्यते। उपरिष्ठे लोके एकः प्रकारः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इन्द्रः यत्र भवति सः देवलोकः, ब्रह्मणः सत्यलोकः, विष्णोः वैकुण्ठः, परमेश्वरस्य कैलासः इत्यादयः। उपनिषदः एतान् सर्वानपि एकप्रकारेण ब्रह्मलोकः इत्येव वर्णयन्ति। पुराणानि तु एतान् लोकान् पृथक्कृत्वा वदन्ति। अधः विद्यमानः नरकलोकः। मध्ये विद्यमानः सुखं दुःखमिति उभयमिश्रितं मिश्रलोक इति ज्ञायमानः अस्मल्लोकः। अत्र सुखदुःखानि बहुषु विहितमानेषु मिश्रितानि भवन्ति। अधिकं सुखं - स्वल्पदुःखमित्यारभ्य स्वल्पं सुखम् - अधिकदुःखमिति पर्यन्तं बहुविधानि विहितमानानि भवन्ति, बहूनि मानबिन्दूनीव!

तथापि अस्माकं शास्त्रानुसारम् अन्यलोकादपेक्षया अयं भूलोक एव उत्कृष्टः भवति! कुतः? अस्माल्लोकात् अन्यलोकान् प्रति स्वच्छन्दं गन्तुं शक्यते। अन्यलोकेषु इत्थं यथेच्छमन्यलोकं प्रति गन्तुं न शक्यते। नरके कष्टमसह्यमानः पलायनं कृत्वा आगन्तुं शक्यते वेति चेन्न शक्यते। पापकर्मक्षयपर्यन्तं तत्रैव वस्तव्यम्। **एतावत्कालपर्यन्तमयमत्र भवेत्** इति धर्मराजः लिखति। अतः तत्र वयं यथेष्टं किमपि कर्तुं न शक्नुमः। **स्वर्गलोकः सुखमयः अस्ति, इतोऽपि कश्चित् कालः तत्रैव भवाम** इति इच्छामश्चेदपि, क्षीणे पुण्ये तत्र वस्तुं न शक्यते। हठात् इति भूलोके पतनीयमेव। भूमौ एव अस्माकं पृथक् स्वातन्त्र्यं किञ्चिद्भवति। पुण्यं कर्तुं शक्यते। पापमपि कर्तुं शक्यते। हस्तेन पूजामपि कुर्मः, ताडनमपि कुर्मः। जिह्वया नामसङ्कीर्त्तनमपि कुर्मः, कञ्चित् तर्जयामः च। द्वयोरपि अस्माकं शक्तिः अस्ति। एवं प्रत्येकम् इन्द्रियस्य ईश्वरः द्विविधां शक्तिं दत्तवान्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

इदं स्वातन्त्र्यम् अन्येषु लोकेषु न भवति। ताः सर्वाः भोगभूमयः। गौः भूत्वा पुण्यं कर्तुं शक्यते वा? देवाः अपि ताः गाः इव। गोः पुण्यं वा पापं नास्ति। अस्मिन् भूलोके मनुष्यरूपेण जनिं प्राप्य वयमेव कर्मानुष्ठानं कृत्वा सद्गतिं प्राप्नुयाम। देवलोके तन्न शक्यम्। कृषिकार्यं कर्तुं क्षेत्रस्थानमस्माकं लोकः एव। अन्ये लोकाः तावत् तत्फलस्य भोजनाय भोजनशाला एव, न तु तदुत्पत्तिस्थानानि। तत्र फलमेवानुभोक्तुं शक्यम्। यावत्पुण्यपापं कुर्मः तावत्फलमनुभवामः। अत एव तेषां भोगभूमिः इति नाम भवति। अस्माकं लोकः कर्मभूमिः। क्रियमाणा शक्तिः अत्रैव भवति। अत्र स्वातन्त्र्येण मनसा चिन्तयित्वा कार्यकरणं मनुष्यजन्मप्राप्तवतामेव भवति। इतरेषां जीवराशीनाम् अन्तःप्रेरणा (Instinct) द्वारा कार्यं कुर्वन्ति। कर्म कर्तुमितरेषां लोकवासिनामधिकारः नास्ति।?

मनुष्येण क्रियमाणं कर्म, तस्य गुण इत्युभयं संमिल्य जीवमन्यलोकं प्रति नयन्ति। कर्म कृत्वा गुणं संस्कृत्य परलोकं गन्तुं अस्याः कर्मभूमेः इतरा भूमिः न साध्याः।।

किञ्चन कर्म कर्तुं तस्य देशकालनियमाः भवन्ति। श्राद्धमर्धरात्रौ करणं युक्तं किम्? तस्य युक्तः कालः भवति। तथैव तस्य कर्मणः देशः इत्यपि भवति। तत्कर्म पुण्यभूमौ एव करणीयम्। मुख्यतया भारतवर्षे वैदिककर्माणि करणीयानि। अस्मिन् देशेऽपि केचन निषिद्धाः कालाः भवन्ति। परिशुद्धे स्थाने परिशुद्धे काले कर्माणि करणीयानि।।

(अनुवर्तते.....)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

महाभारते मोक्षधर्मपर्वणि वेदान्तविचारः

(मोक्षधर्मसाधनानि)

Sri. K. KALIVARADHAN
Research Scholar, SCSVMV, Kanchipuram

भयं श्वासं च रक्षेत्, इच्छा, द्वेषं, भ्रमं च विनिवर्तयेत्
अप्रमादात् भयं रक्षेत् श्वासं क्षेत्रज्ञशीलनात् ।
इच्छां द्वेषं च कामं च धैर्येण विनिवर्तयेत् ।। (२७४.६)
भ्रमं सम्मोहमावर्तमभ्यासाद् विनिवर्तयेत् ।
निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्ववित् ।। (२७४.७)

विवेकिनः स्वसंङ्कल्पात् क्षमया कामक्रोधादीनां उच्छित्तिं प्राप्य सत्वसंसेवनात् निद्रामपि छेत्तुम् शक्तः । जागरूकता भयं, क्षेत्रज्ञध्यानेन स्वासं च रक्षणं, कामेच्छाद्वेषं च धैर्येण विनिवर्तनं, भ्रमं मोहमावर्तविनिवर्तनं शास्त्राभ्यासात्, ज्ञानाभ्यासेन प्रतिभाविनिवृत्तीम् च प्राप्तुमर्हति ।

स्नेहं, क्षुधा, मानं, तृष्णा च विनिवर्तयेत्

अनित्यत्वेन च स्नेहं क्षुधां योगेन पण्डितः ।
कारुण्येनात्मनो मानं तृष्णां च परितोषतः ।। (२७४.१०)

स्नेहं अनित्यमिति विचिन्त्य त्यजेत्, क्षुधां योगेन जयेत्, कारुण्येन आत्मनो मानं, परितोषतः तृष्णां च पण्डितः विनिवर्तयेत् । वाक्, मनः, आत्मानं च यच्छेत्

यच्छेत् वाङ्मनसी बुद्ध्या तां यच्छेज्ज्ञानचक्षुषा ।
ज्ञानमात्मावबोधेन यच्छेदात्मानमात्मना ।। (२७४.१२)

आत्मा ब्रह्मेति अवबोधेन इन्द्रियाणि मनसि, मनो बुद्धौ, बुद्धिं त्वंपदार्थे, तं ब्रह्माकारवृत्तौ, तां शुद्धात्मनि च, इति क्रमेण प्रविलाप्य,

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

स्वरूपात्मनाऽवतिष्ठेत् । एवं वेदान्तश्रवणाद्यभ्यासात् वैराग्याच्च, कामक्रोधविवर्जनम्, दर्पाहंकारराहित्यम्, अनिकेतत्वम् च कामवैपरीत्येन निष्कामः कर्तव्यमिति भीष्मः युधिष्ठिरं प्रति मोक्षोपायान् प्रतिपादयति । सत्यं वद, तपस् कुर्यात् :- **सत्यमेव जयते नानृतम्** (मुन्.उप. ३.१.६) इति श्रुत्योपदिष्टवत्

सत्यं ब्रह्म तपः सत्यं विसृजते प्रजाः ।
सत्येन धार्यते लोकः स्वर्गं सत्येन यच्छति ।। (१९०.१)

इति भृगुमहर्षिवाक्यमाश्रित्य सत्यमेव परिपालयतामिति भीष्मः युधिष्ठिरम् उपदिशति । भ्रष्टैश्वर्येण वृत्रेण कथं शाकं हृष्यं च तं न बाधते इति यदुपदिष्टं तद् स्मारयति भीष्मः :

सत्येन तपसा चैव विदित्वा संशयं ह्यहम् ।
न शोचामि न हृष्यामि भूतानामागतिं गतिम् ।। (२७९.१६)

तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते (मनु. १२.१०४), **तपसा ब्रह्म विजिज्ञासस्व** (तै.उप. ३.२.५), सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् । (मुन्.उप. ३.१.५) इति आत्मज्ञानार्थं श्रुतिवाक्यं विमृश्य तपः कुर्यात् इति उपदिशति ।

उपसंहारः भारतीयसंस्कृतेः सनातनधर्मस्य च प्राणभूतानि श्रुतितुल्यप्रमाणाणि च सङ्ग्रहीतुं मोक्षधर्मपर्वण्योक्तजीवब्रह्मैक्यभावनिदर्शनाः अद्वैतवेदान्तसारप्रबोधकाः कथम् अतुलं महत्वं आवहन्तीति वर्णनातीतम्। विविधधर्मशास्त्रीयज्ञानप्रदीपत्वात्, समन्वितत्वात्, ऐतिह्यविदग्धत्वात्, राजनीतिशास्त्रनिष्णातत्वात् च ऐतिहासमिदं महाभारतम् अल्पधियामपि मनांसि सङ्गीतात्मकतया रञ्जयति इत्यस्मिन् विषये कः आक्षेपः।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

The Self as the highest aim according to Vedāntasiddhāntamuktāvali of Prakāśānanda

Sri. SRIPATHY
Research Scholar, Dept. of Sanskrit & IC, SCSVMV

Nor it can be said that like the garland and its effect happiness which is produced, the effect pleasure is produced automatically when a man approaches Self. Then a question may come to mind that the relationship between the Self and pleasure should be in the nature of samavāya. But this is not as such, because samavāya is not produced and eternal for Naiyāyikas. Also, from the common statement "may pleasure be mine and may pain cease for me", it is very clear that pleasure and absence of pain is the highest aim and nobody evince interest that "may Self be mine". Therefore, in any manner, the Self is anupādeya i.e. not being suitable to consider it as a puruṣārtha. If the Self is the puruṣārtha, then the desire to die in holy prayāga becomes futile. Even scriptures prescribe this to attain the desired objects or pleasure. Thus, pleasure and absence of pain is upādeya and not the Self.

The vedantic passage "Brahman is Intelligence, Bliss" declares the Self as pure bliss and śravaṇa, manana and nididhyāsana are the

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

means for self-knowledge. May be, but this doesn't mean that Self can be the puruṣārtha. The pleasure in the Self is not the aim and if so then the pleasure of the enemy would also become an aim. But the pleasure in one's own Self is the aim. The śravaṇa, manana and nididhyāsana are prescribed in order to eradicate pain and to attain pleasure but it is not the attainment of Self. Thus, the Self is not the highest aim of a man (anupādeya) and it is the pleasure and absence of pain is the highest aim of man (upādeya).

Prakāśānanda completely rejects the said objections and says that the Self is the only entity that can be under the realm of upādeya and it is not the pleasure and absence of pain since the both are for the sake of Self or depend on Self. The Self is the positive one and there is the absence of pain in Self; but on the other hand, pain which is unreal in nature cannot be in Self which is a positive entity. Since, the Self is the only existent from which all that is regarded as distinct is sheer non-entity like the horns of a man, the controller of all living beings from Brahmā down to insects, the eye of all things, the mind of the mind and the light of the lights and the pervading one, it cannot be the anupādeya.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Moreover, Self is the ocean of bliss of which only a small portion belongs to this world and the majesty of Hiranyagarbha is nothing in front of it. Nobody can reject such an ocean of pleasure which pervades Brahmā and the rest. All the various vedic actions or sacrifices have as their result the desire to know the Self only. Such a majestic entity must be the highest aim of a man and how can that not be the aim by the mere knowledge of which all desires, the causes of pain perish immediately ?

Furthermore, if the Self is the highest aim of a man, then one may raise an objection on the difference between a jñānī and ajñānī since the Self is same in its character in both the jñānī and ajñānī. Knowledge and ignorance is the difference between them. The ignorant think the Self as an enjoyer, agent, transmigratory and subject to birth and death and whereas the jñānī in whom the ignorance is exterminated knows the Self as devoid of all such qualities. The puruṣārtha is not a mere absence of pain. In respect of removing the pain and attaining pleasure, man uses the objects of this world which are of the nature of pain only. . The permanent pleasure cannot be attained with the help of

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

painful and unreal objects. Hence, it is quite tenable to consider the Self which is of the nature of eternal bliss can be the highest aim and the unreal objects cannot be as such and no dispute can be raised in this regard. The eternal bliss is not a product since it is not produced and it is nothing but the very nature of Self. Therefore, the self-realised says I am bliss itself i.e. a mere affirmation of his original nature. But, this does not happen for the ignorant who falsely identifies the Self with his body and says I am happy, I am in pain, etc., and brings the Self within the realm of pleasure and pain mistakenly. Due to this wrong notion, the logicians imposes qualities such as *sukha*, *jñāna*, etc., on the Self. Because of this wrong notion i.e. the superimposition of non-self with the Self and forgetting the nature of Self as eternal bliss, the lepers and others choose the option of death at the favourite rivers to free the Self from pain and to give pleasurable life in another world after their death. Therefore, according to Prakāśānanda, the *upādeyatva* i.e. the quality of being suitable to consider as the highest aim lies only in the Self and pleasure and absence of pain cannot be the highest human goal.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बालकथा - ५

(वृद्धपितामही चिरन्तनीति नामधेयवती बालान् कथयति)

(चित्रम् - सु.श्री.इन्दु, Intern, SJS Ayurveda College, Chennai)

बालकाः मिथ्यां कदापि मा कथयन्तु। मिथ्याकथनम् अस्माकम् अन्येषामपि हानये भवति। अत्र उदाहरणरूपेण कथामेकां कथयामि। श्रुण्वन्तु।

पुरा करवन्दपुरं नाम ग्रामः आसीत्। तत्र मरुत्तनामा कश्चन जनः अभवत्। सः सर्वदा मिथ्यावादी अभूत्। मिथ्यया अन्येषां भायनं तस्य कार्यम् आसीत्। रज्ज्वा सर्पाकृतिं निर्माय सर्वेषाम् उपरि पातयित्वा तेषां भीतिं दृष्ट्वा अहसत्। हठात् व्याघ्रः व्याघ्रः इत्युक्त्वा सर्वानपि अभाययत्। सर्वेऽपि चकितचकिताः पलायिताः अभूवन्। ततः परं हसन् मरुत्तः व्याघ्रः नास्ति, केवलं मिथ्या उक्ता इत्युक्त्वा सर्वानपि अवञ्चयत्। इत्थं बहुवारं विकटरूपेण प्रवर्तनं तस्य कार्यम् आसीत्। अनेन कार्येण जनाः सर्वे तस्य वाक्येषु श्रद्धां न कुर्वन्ति।

अथापि सः सर्वेषां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Siddhanta eGangotri Gyaan Kosha

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भयोत्पादेन मिथ्याकथनेन च जनानां विश्वासपात्रताम् अत्रुटत्। एकदा नदीजले विहरन्तं तं नक्रः कश्चन अगृह्णात्। सः उच्चैः क्रन्दन् सर्वानपि समाहूयत। किन्तु तस्य क्रन्दनं मिथ्या इति चिन्तयन्तः तस्य नाटकम् इति मन्यमानाः तं त्यक्त्वा अगच्छन्। साह्यहीनः मरुत्तः नक्रेण नीयमानः दैवात् नद्याम् आगतं काष्ठम् एकं लब्ध्वा तेन नक्रं सन्ताड्य ततः रक्षितः अभूत्। ततः तस्य बुद्धिरागता। सर्वेषां पुरतः क्षमां याचमानः इतः परं मिथ्यां न कथयामि, मिथ्याकथनस्य फलं लब्धवान् अहम् इति अरुदत्। सर्वे जनाः तस्य स्थितिम् अवागमन्। ततः परं सः मिथ्यां न अवदत्।

बालाः किमु अश्रौषुः भवन्तः इमां कथाम्। हास्यार्थं उच्यमाना मिथ्या आत्मनः अपि हानिं कल्पयति। अतः भवन्तः सावधानाः भवन्तु। हास्यार्थमपि मिथ्यां मा कथयन्तु। विकटरूपधरणेन हानिरेव सर्वेषामिति अवगच्छन्तु। भवन्तः सत्यमेव कथयन्तु। अन्यस्य भायनाय आत्महानिं मा जनयन्तु।

❀ भारतवाणी ❀

पृष्टो हि साक्षी यः साक्ष्यं जायमानोऽन्यथा वदेत्।
स पूर्वानात्मनः सप्तकुले हन्यात्तथा परान्।। १.७.३

ஸாக்ஷியானவன் உண்மை தெரிந்தும்
தவறான ஸாக்ஷ்யத்தை உரைத்தால் தன்னையும்
சேர்த்து தன் குலத்தைச் சேர்ந்த முன்னேழு
தலைமுறையையும் தனக்குப் பின்னேழு
தலைமுறையையும் அழிக்கின்றான்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

INTRODUCTION TO HINDU CONCEPT OF LAW

Sri. T.S. SUDARSHAN
Research Scholar, Dept. of Sanskrit & IC, SCSVMV

The principles which we have to observe in our daily life and social relations are constituted by what is called dharma. Under this concept the Hindu brings all the forms of activities which shape and sustain human life. It is truth's embodiment in life and power to refashion our nature. It represents the privileges, duties and obligations, his standard of conduct as a member of the Civilized community and as a member of a particular stage of life (asrama). Dharma is a word of protean significance. In its primary sense it is the norm which sustains the Universe, the principle of a thing in virtue of which it is, what it is. It is the essential nature or quality of persons or things - the itness of a thing without which it ceases to be that thing. We can thus say that the dharma of stone is to be rough, of fire is to burn, of a tiger is to be fierce, for, without roughness, heat and ferocity, stone, fire and tiger cease to be what they are.

Plato at the commencement of the 'Dialogue of Laws' lays down as a fundamental principle that

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

the end of legislation is to make man virtuous. Rishies in speaking of dharma use similar language. They define it as that from which results happiness and final beatitude. It is that which has to be done to secure visible and invisible good. Morality, Law, Virtue, Duty are all based on the idea of the good, and, dharma may be said to include all these.

The dharma concept was not merely a religious concept and an ethical concept but was also a sociological concept. Political life was conceived as a part of and not independently of the general scheme of man's existence. The whole life of citizens as distinguished from the material or secular side was brought under the supervision of the State and in this respect, the concept extended the sphere of state action. In another respect the concept restricted the sphere of state action in that the state could not make laws. The notion that every law is a command of the sovereign so fully developed by Austin was never associated with the idea of dharma. The King himself was subject to the doctrine of dharma Raja Dharma. The aim of the State was to act in conformity with what

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

was deemed to be the established order of the universe. Hence dharma was held as derived from Loka Dharma (sustaining the world).

Again unlike the Austinian concept of sanction operating from without, the dharma concept made the sanction operate from within. Dharma is said to destroy those that disobey it and preserve those that follow it. This is but a corollary to the meaning of dharma as that whichsustains a thing. Fire which refuses to burn ceases to be fire because without burning fire is impossible. Dharma derives its sanction from no earthly power. The dharma of the king is merely to ascertain the dharma of individuals in case of doubt or conflict and promulgate and enforce it if need be, and for this, he is given the power of punishment (danda).

From the concept of dharma explained that in Ancient polity Law was supreme. "Law" we readin the Veda "is the king of kings, far more powerful than they; nothing can be mightier than the law, by whose aid, as by that of the highest monarch, even the week may prevail against the strong.

[To be continued.....]

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पदरञ्जनी - १९

Dr. N. SRIDHAR,
Srinivas Fine Arts Pvt Ltd. Chennai - 31

(अस्य समीचीनमुत्तरं editorsamskritasri@gmail.com प्रति ई-मैल् कर्तुमपि शक्नुवन्ति। समीचीनोत्तरप्रदातॄणां नामप्रकाशनम् अग्रिमसञ्चिकायाम्।)



वामतः दक्षिणम्

१. सीता (३)
४. छर्दनम्, वान्तिः (३)
६. कार्त्तिकेयः कम् असुरं हतवान् ? (५)
८. शरीरम् (२)
९. अतिसूक्ष्मः, धान्यांशः (२)
११. ब्राह्मणः, पृथिव्या अमरः (देवः) (३)
१४. पापम् (३)
१६. जनकः (२)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

१७. रक्षणम् (२)

१८. मृगतृष्णा, कटुरसयुक्तः कष्टान शाकविशेषः (४)

२०. आर्द्रः (२) २१. तनोर्भावः, गात्रे तनुता (३)

२२. पर्यटनम् (२) २४. पशुः (२)

२५. रात्रिः (३) २८. वासः (२)

२९. सरोवरः, शुष्के नीरे कः ..... (३)

उपरिष्टात् अधः

१. पुत्र्याः पतिः (३) २. व्यजनम् (३)

४. पृथिवी (४) ५. जलं, क्षीरम् (२)

७. युद्धभूमिः (२) ८. एक चक्षुषा पश्यति (२)

९. हस्तः, राजस्वं, बलिः (२) १०. नाटकभेदविशेषः (४)

११. अर्थः, वित्तं, द्रविणम् (२) १२. समुद्रः (३)

१३. ददातीति ..... (२)

१५. दक्षते वर्द्धते भारधारणे, पृथिवी (२)

१६. पिकस्य आनन्दः अस्मिन् काले, वसन्तः (४)

१८. हस्तिगण्डजलम् (२) १९. शवदाहाधारचुल्ली (२)

२०. दासी, चेटी (२) २२. शत्रुः (२)

२३. तत् सर्वनामशब्दः, स्त्री. सप्त. वि. बहु.व. (२)

२४. सेना (२)

२५. खड्गः, कृपाणः, काश्यां प्रवाहमाणा काचन नदी (२)

२६. पूर्णचन्द्रः (२) २७. बाणः (२)

एकाक्षरम्

३. कम्पनम्

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पदरञ्जनी - १७ (उत्तराणि)



साधूत्तरं प्रेषितवत्योः नाम
श्री. शे. गुरुस्वामी, कलञ्जेरी, तञ्जावूर्
श्रीमती. उषा बालसुब्रह्मण्यः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

साहित्यचित्रम्

सा तद्घस्तात् समुत्पत्य सद्यो देव्यम्बरं गता ।
अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ।। ९
दिव्यस्रगम्बरालेपरत्नाभरणभूषिता ।
धनुःशूलेषुचर्मासिशङ्खचक्रगदाधरा ।। १०

श्रीमद्भागवतम् १०.४

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Registration with Registrar News Paper of India 30478 / 77
SAMSKRITASRI

मैत्रीं भजताऽखिलहृज्जेत्रीम्
आत्मवदेव परानपि पश्यत।
युद्धं त्यजत, स्पर्धां त्यजत
त्यजत परेष्वक्रममाक्रमणम्
जननी पृथिवी कामदुघाऽस्ते
जनको देवः सकलदयालुः
दाम्यत दत्त दयध्वं जनताः
श्रेयो भूयात्सकलजनानाम्।।



Printed by: Zigma Graphics, 9/1, Thirtharappan Street, Triplicane - 5
Edited and Published by Sri S. Srinivasa Sarma on behalf of the
Samskrit Education Society (Regd.)
Old 212/13-1, New No, 11, St. Mary's Road, R.A. Puram, Chennai - 600028.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,